अत्यालः, पुं, (अति अत्यायेन था चतुर्द्दिक्षु अलति भूषति अति+आ+अल+कर्त्तरि अच् । लालचिता इतिभाषा) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

अत्याशा, स्त्री, (अतिशयेन आशा) अतिशयाशा । अत्यन्तस्पृहा । असम्भावनीयवाञ्छा । यथा,—
"अत्याशाभिरुपागताध्वगगणान् धन्वावनौ तापितान्नीयत्तर्पयितुं क्षमोऽस्मि मम तद्दुःखैर्मनो दूयते"। इत्युद्भटः ॥

अत्याहारी [न्] त्रि, अतिपूर्ब्बाङ्पूर्ब्बहृधातोः कर्त्तरि णिन्प्रत्ययनिष्पन्नः । अतिशयाहारकर्त्ता । बह्वाशी । अपरिमितभोजी ॥

अत्याहितं, क्ली, (अत्यन्तमाधीयते तन्निवारणाय चित्तं निधीयते ऽत्र अति आ+धा+क्तोऽधिकरणे द्रव्यगतिप्रत्यवसानार्थेभ्यश्च इति सूत्रेण क्त अधिकरणे) महाभीतिः । अतिशयभयं । जीवानपेक्षि कर्म्म । जीवनाशाशरहितसाहसकर्म्म । इत्यमरः ॥ (अत्याहितं किमपि राक्षसकर्म्म कुर्य्यात् । इति रामायणं ।)

अत्युक्तिः, स्त्री, (अतिशयेन उक्तिः कथनम् अति+वच्+भावे क्तिन्) आरोपितकथनं । अतिशयोक्तिः । असम्भवोक्तिः । अलङ्कारविशेषः । यथा ।
"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः" ॥
इति चन्द्रालोकः ॥

अत्यूहः, पुं. (अतिशयेन ऊहते स्वजनितहर्षावर्द्धककण्ठं यथा तथा शब्दायते यः अति+ऊह+कर्त्तरि अच् । अतिशयितः ऊहस्तर्कः प्रादीति समासः, अतितर्कः) कालकण्ठः । दात्यूहपक्षी । इति मेदिनी ॥ अतिशयवितर्कः ॥ (अत्यूहा नीलिकायां स्त्री कलकण्ठखगे पुमान् ॥ इति मेदिनी ॥)

अत्यूहा, स्त्री, (अतिशयितः ऊहः पुष्पोत्कर्षेण तर्को यस्याः सा स्त्रियां टाप्) नीलिका । शेफालिका । इति मेदिनी ॥

अत्र, व्य, एतद्+सप्तम्यर्थे त्रल् एतदश्शब्दस्य अशादेशः) एतस्मिन् । एखाने इति भाषा । एतच्छब्दस्य सप्तम्यास्त्रादेशे रूपोऽयं ॥ (अपि सन्निहितोऽत्र कुलपतिः । इति शाकुन्तले ॥)

अत्रभवान्, [त्], त्रि,(एतद्+अन्येभ्योऽपीति प्रथमार्थे त्रल् अत्र अयं भवान् कर्म्मधारयः ।) पूज्यः । श्लाघ्यः । मान्यः । नाटकेऽस्य प्रचुरप्रयोगः । इति हेमचन्द्रः ॥ (नूनमत्रभवतः शराकृतिं सर्व्वथायमनुयाति सायकः ॥ इति भारविः ॥)

अत्रिः, पुं. (अत्ति स्म एकगण्डूषेणैव सर्व्वमेव गङ्गाजलं पीतवान् अद्+कर्त्तरि त्रिन् दस्य तः ।
"मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
ब्रह्मणो मानसाः पुत्राः वशिष्ठश्चेति सप्त ते" ॥
इति) सप्तर्षिमध्ये ऋषिविशेषः । स च ब्रह्मणश्चक्षुषो जातः । तस्य भार्य्या कर्द्दममुनिकन्या अनसूया । पुत्त्राः दत्तः १ दुर्व्वासाः २ चन्द्रश्च ३ । इति श्रीभागवतं ॥ (यथा मनुः,—
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुं ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च" ॥)

अत्रिजातः, पुं, (अत्रेर्जात उत्पन्नः पञ्चमीतत्पुरुषः ।) चन्द्रः । द्विजन्मा । यथा,—
"अत्रिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च ।
क्व सा चैवात्रिजातस्य तमसो दुर्जनस्य च" ॥
इति त्रिविक्रमभट्टः ॥

अत्रिदृग्जः, पुं, (अत्रेः दृक् चक्षुः षष्ठीतत्पुरुषः तस्मात् जातः अत्रि दृक्+जन्+ड उपपदसमासः ।) चन्द्रः । इति हेमचन्द्रः ॥

अत्रिनेत्रजः, (पुं,) चन्द्रः । इति जटाधरः ॥

अत्रिनेत्रप्रसूतः, पुं, (अत्रिनेत्रात् प्रसूतः पञ्चमीतत्पुरुषः) चन्द्रः । इति हलायुधः ॥

अत्रिनेत्रभूः, पुं, (अत्रिनेत्रात् भवति यः अत्रिनेत्र+भू+कर्त्तरि क्विप्) चन्द्रः । इति त्रिकाण्डशेषः ॥

अत्रिभारद्वाजिका, स्त्री, अत्रिश्च भरद्वाजश्च द्वन्द्वः तयोः स्त्रीपुंसयोर्म्मैथुनात् जाता अत्रि भरद्वाज+"द्वन्द्वाद्वुन् वैरमैथुनयोरिति" वुन् तस्य अकः स्त्रियां टाप्) अत्रिभारद्वाजी विवाहः । इति शब्दरत्नावली ॥

अथ, व्य, (अर्थ+ड एषोदरादित्वात् रस्य लोपः ।) मङ्गलं । अनन्तरं । आरम्भः । प्रश्नः । कार्त्स्न्यं । इत्यमरः ॥ अधिकारः । संशयः । विकल्पः । समुच्चयः । इति मेदिनी ॥ (अथ तस्य विवाहकौतकं ललितं बिभ्रत एव पार्थिवः ॥ इति रघुवंशे ॥)

अथकिं (अर्थं पूर्ब्बोक्तं वाक्यं कवते स्वीकरोति अर्थ+कु+डिम् एषोदरादित्वात् वस्य लोपः । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः ।) व्य, स्वीकारः । इति शब्दरत्नावली ॥

अथर्व्व [न्] क्ली, (अथ लोकमङ्गलाय अर्व्वते प्रस्तूयते यत् अथ+अर्ब्ब+कर्म्मणि अनिप् शकान्ध्वादित्वात् पररूपं । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरः) वेदविशेषः । इति मेदिनी ॥ तत्तु चतुर्थवेदः नवशाखायुक्तः । अस्य विवरणं वेदशब्दे द्रष्टव्यं ॥

अथर्व्वणः, पुं,(अथर्व्व विद्यतेऽस्य न प्रत्ययः ।) शिवः । इति त्रिकाण्डशेषः ॥

अथर्व्वणिः, पुं, (अथर्व्ववेदं नयति ज्ञानविषयं प्रापयति अथर्व्वन्+नी+कर्त्तरि क्विप् । एषोदरादित्वात् ह्रस्वः) अथर्व्ववेदज्ञब्राह्मणः । पुरोहितः । इति मेदिनी ॥

अथर्व्वा [न्] पुं, (अथ लोकमङ्गलाय अर्व्वति वेदविशेषं प्रस्तौति अथ+अर्व्व+अनिप् शकन्ध्वादित्वात् पररूपं) ब्राह्मणः । इति मेदिनी ॥ (कृतपदपंक्तिरथर्व्वणेव वेदः ॥ इति भारविः ॥

अथो, व्य, (अर्थ+डो एषोदरादित्वात् रलोपः) मङ्गलं । आनन्तर्य्यं । समुच्चयः । प्रश्नः । आरम्भः । कार्त्स्न्यं । अधिकारः । संशयः । विकल्पः । इति मेदिनी ॥
("स्त्रियो रत्नान्यथो विद्या धर्म्मः शौचं सुभाषितं ।
विविधानि च शिल्पानि समादेयानि सर्व्वतः" ॥
इति मनुः ॥)

अद इ बन्धे । (भ्वादि परस्मैपदी सेट् इदित्) इति कविकल्पद्रुमः ॥ इ अन्द्यते । इति दुर्गादासः ॥

अद लृ क्तौ भक्षणे (अनिट् परस्मैपदी अदादि ।) इति कविकल्पद्रुमः ॥ लृ अत्ति । क्तौ अत्ता । गणाकृतमनित्यमिति न्यायात् शपःस्थितौ अदतीत्यपीति वररुचिः । इति दुर्गादासः ॥

अदः [स्] त्रि, (न दस्यते अङ्गु इदन्तया अङ्गुलिस्तत्क्षिप्यते यत्र न+दस्+बाहुल्यात् क्विप् त्रिलिङ्गत्वञ्च ।) एतत् । पुरोवर्त्ति । एह इति भाषा । परं । परोक्षभूतं । इति मेदिनी । सेइ इति भाषा ।

अदत्तं, त्रि, (न दत्तम् उत्कृष्टं नञ्समासः नञत्र अप्राशस्त्ये यथा कारिकायां ।
"तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥
इति ।) अन्यायेन दत्तं । यथा । यत् पुनरन्यायेन दत्तं तददत्तं । षोड़शप्रकारमपि प्रत्याहर्त्तव्यमेव इत्यर्थादुक्तं भवति । नारदेन च । दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं ।
"अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितं ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति ॥
अयमर्थः । भयेन वन्दिग्राहादिभ्यो दत्तं । क्रोधेन पुत्त्रादिवैरनिर्यातनायान्यस्मै दत्तं । पुत्त्रवियोगादिनिमित्तशोकावेशेन दत्तं । उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तं । परिहासेनोपहासेन दत्तं । एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः । छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति । बालेनाप्राप्तषोड़शवर्षेण । मूढ़ेन लोकवेदानभिज्ञेन । अस्वतन्त्रेण पुत्त्रदासादिना । आर्त्तेन रोगाभिभूतेन मत्तेन मदनीयप्रमत्तेन । उन्मत्तेन वातिकाद्युन्मादग्रस्तेन । अपवर्जितं दत्तं । तथायं मदीयमिदं कर्म्म करिष्यतीति प्रतिलाभेच्छया दत्तं । अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तं । यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि दत्तमदत्तमित्युच्यते । प्रत्याहरणीयत्वात् । आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयं ।
"स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात् ।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥
इति कात्यायनस्मरणात् । यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति यश्चादेयं प्रयच्छति । तयोर्दण्डो नारदेनोक्तः ।
"गृह्णात्यदत्तं यो लोभात् यश्चादेयं प्रयच्छति ।
अदेयदायको दण्ड्यस्तथा दत्तप्रतीच्छकः" ॥
इति मिताक्षरा ॥ कन्यकानां त्वदत्तानां । इति कात्यायनः ॥